* R S - 0 0 1 - 0 0 1 5 3 3 *

# RS-001-001533

Seat No. ________

## B. A. (Sem. V) (CBCS) Examination

**March – 2019**

## Sanskrit : Paper-15

*(संस्कृतभाषा एवं साहित्य)*

*(Old Course)*

*१. शुकनासोपदेशः ।*
*२. संस्कृत निबन्धः ।*
*३. संस्कृत छन्दः ।*

**Faculty Code : 001**
**Subject Code : 001533**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

१ (અ) નીચેનામાંથી કોઈપણ **એક** ગદ્યખંડનો અનુવાદ કરો : ८

1 (A) Translate any **one** of the following passage : 8

(१) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् । इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीर सागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैः श्रवसश्चञ्चलताम् कालकूटान्मोहनशक्तिम् मदिराया मदम्, कौस्तुभ– मणेरतिनैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद् विरहविनोदचिह्नानि गृहीत्वेवोद्गता ।

(२) इदमेव च पुनः पुनरभिधीयसे । विद्वांसमपि, सचेतनपि महासत्वमप्य भिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति । सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेक मंगलम् कुलक्रमागतामुदवह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय बन्धुवर्गम्, अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तदीपभूषणां पुनर्विजयस्व वसुन्धराम् ।

(બ) નીચેનામાંથી કોઈપણ **બે** સંદર્ભ સહિત સમજાવો : ६

(B) Explain any **two** of the following with reference to the context : 6

(१) चन्दनप्रभवो न दहति किमनलः ।

(२) तोयराशिसंभवापि तृष्णां सवर्धयति ।

(३) तृष्णाविषमूर्च्छिताः कनकमयमिव सर्व पश्यन्ति ।

(४) कामंभवान् प्रकृत्यैव धीरः ।

२ નીચેનો પરિચ્છેદ વાંચી તેની નીચે આપેલા પ્રશ્નોનાં ઉત્તર સંસ્કૃતમાં લખો : **૧૪**

(કોઈપણ **એક**)

**2** Read the following passages and write answers in Sanskrit to the question given below it : (any one) **14**

(१) अस्ति भागीरथी तीरे गृध्रकूटनाम्नि पर्वते महान पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथकृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचित्किंचिदुध्धृत्य ददति । तना सौ जीवति । शावकानां रक्षणं करोति । अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षयितुं तत्रागतः ततस्तमायान्तं दृष्टवा पक्षिशावकैर्भयतैः कोलाहलः कृतः । तच्छुत्वा जरद्गवेनोक्तम् कोऽयमायाति दीर्घकर्णो गृध्रमवलोक्य सभयमाह – हा हतोऽस्मि यतः –

तावद् भयस्य भेतव्यं यावद् भयमनागतम् ।

आगतं तु भयंवीक्ष्य नरः कुर्याद् यथोचितम् ॥

अधुनास्य सन्निधाने पलायितुमक्षमः । तद्यथा भवितव्यं तद्भवतु । तावद् विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोप्योपसृत्याब्रवीत्–आर्य त्वामभिवन्दे । गृध्रोऽवदत् – कस्त्वम् । सोऽवदत् – मार्जारोऽहम् । गृध्रो ब्रूते – दूरमपसर । नो चेत हन्तव्योऽसिमया । मार्जारोऽवदत् – श्रुयतां तावदस्मद्वचनम् । ततो यद्यहं बध्यस्तदाहन्तव्यः ।

(१) किदृशः गृध्रः भागीरथी तीरे प्रतिवसति । किं नामधेयम् गृध्रः ?

(२) गृध्रस्य जीवनाय वृक्षवासिनः पक्षिणः किं ददति ?

(३) पक्षिशावकान् भक्षयितु तत्र कः आगतः ?

(४) भयस्य कदा भेतव्यम् ?

(५) गृध्रः मार्जारं किं कथयति ?

(६) मर्जारं आयान्तं दृष्ट्वा पक्षिशावकैः किं कृतम् ?

(७) किं नाम धेयं मार्जारः ?

(२) आसीन्मिथिलायां हरसिंहदेवो नाम राजा । तस्य गणेश्वरो नाम मन्त्री बभूव । तस्य च नानाविधां सुबुद्धितां श्रुत्वा देवगिरे रामदेवो राजा परमसाश्चर्यश्चिन्तयामास । कथं मर्त्यलोकवासिनोऽपि, बृहस्पते रिव मनीषा श्रुयते । भवतु निरूपयामि तावत । तदन्तरं स राजा हरसिंहदेवेन राज्ञा समं मैत्रीमाचरत् । तदन्तरमुभयदिगुपचारेण सौहार्दे समुत्पन्ने स राजा रामदेवो हरसिंह देव लिखितद्वारा ययाचे यन्मह्यं द्वौ पुरूषौ प्रेषयितव्यो, एकः सुधीर्द्वितीयो मुर्खश्चेति । तदालोक्य लेखनं पठन् स राजा चिन्तयामास यन्मित्र वचनमपरिहार्यम् । कं सुधियं कै च मुर्खं प्रेषयिष्यामीति । चिन्ताव्याकुलितं राजानं दृष्ट्वा मन्त्रिराज उवाच – देव ! किमिति चिन्ता कृताऽस्ति । राजोवाच । मित्रनियोगानिर्वाहः परमलज्जास्थानम् । ततस्तत्र को वा सुधी को वा मूर्ख प्रेषयितव्य इति चिन्तयामि । मन्त्रिराजउदाच । न कश्चित् प्रेषयितव्यः । राजोवाच । आः शान्तं पापम् । मित्रप्रार्थनायाः भङ्गो जायते । एवमुक्ते राजनि मन्त्रिराजो ब्रूते । मित्राभ्यार्थनायाः सिद्धिरेव भवति । यतो रामदेवो महाराजस्तस्य देवगिरिराज्ये किं वस्तुदुर्लभम् । कति पण्डिताः कति मूर्खा वा न सन्ति । तदितः प्रहितेन मूर्खेण पण्डितेन वा किं तस्य प्रयोजनम् । ततस्तर्कयामि स राजा परमविदग्धः कुतुकी च । तथा विधपुरूषबध्ध–यप्रार्थनाव्याजेन भवतो मन्त्रिणं मां स परीक्षते यदहं मूर्खं पण्डितं च परिचिनोमि न वेति । राजोवाच । तत्किं विधातुमुचितम् ॥

(१) गणेश्वरः कस्य मन्त्री आसीत् ?

(२) रामदेवः लिखितद्वारा किं ययाचे ?

(३) यदा मन्त्री चिन्ताकारणम् अपृच्छत् तदाराजा हरसिंहः किं अकथयत् ?

(४) हरसिंहस्य चिन्ताकारणं श्रुत्वा मन्त्रीकम उपायम् अदर्शयत् ?

(५) मन्त्रिणा दर्शितस्य उपायस्य अनुष्ठानेन किं भवति ?

(६) मन्त्रिणः मतेन रामदेवः कीदृशः ?

(७) रामदेवः किं परीक्षते ?

૩ નીચે આપેલા પત્રના વિષયને અનુલક્ષીને સંસ્કૃતમાં પત્ર લખો : (કોઈપણ **એક**) **૧૪**

**3** Write letters in Sanskrit on any **one** of the following subjects : **14**

(१) वक्तृत्वस्पधार्यां श्लोकगानस्पर्धायाञ्च प्रथमक्रमाङ्क प्राप्तवान् पुत्रः स्वपितरं प्रतिपत्रं लिखति ।

(२) छात्रः स्वअग्रजस्य विवाहप्रसंगे स्वगृहे गच्छति । पुनरागमने विलम्बः भविष्यति । अतः अवकाशविलम्बनार्थं स्वस्य अध्यायकाय पत्रं लिखति ।

| | | |
|---|---|---|
| ૪ | નીચેનામાંથી કોઈપણ **એક** વિષય પર સંસ્કૃતમાં નિબંધ લખો : | ૧૪ |
| **4** | Write an essay in Sanskrit on any **one** of the following : | **14** |

(૧) सत्यान्नास्ति परोधर्मः ।

(२) गीता सुगीता कर्तव्या ।

(३) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

(४) धनमहिमा ।

| | | |
|---|---|---|
| ૫ | નીચેનામાંથી કોઈપણ **બે** પર ટૂંકનોંધ લખો : | ૧૪ |
| **5** | Write short notes on any **two** of the following : | **14** |

(१) शुकनास उपदेशे गुरुविचाराः ।

(૨) લક્ષ્મી વિશે બાણના વિચારો.

(2) The thoughts of बाण about लक्ष्मी.

(૩) બાણભટ્ટનું જીવન.

(3) Life of बाण.

(४) बाणोच्छिष्टं जगत्सर्वम् ।